पुरस्तादिमले पात्रे सुविस्तीर्णे मनोरमे ।
सूदः सूपौदनं दद्यात् प्रदेहांश्च सुसंस्कृतान् ॥
फलानि सर्व्वभक्ष्यांश्च परिशुष्काणि यानि च ।
तानि दक्षिणपार्श्वे तु भुञ्जानस्योपकल्पयेत् ॥
प्रद्रवाणि रसांश्चैव पानीयं पानकं पयः ।
खड़ान् यूषांश्च पेयांश्च सव्ये पार्श्वे प्रदापयेत् ॥
सर्व्वान् गुड़विकारांश्च रागषाड़वसट्टकान् ।
पुरस्तात् स्थापयेत्प्राज्ञो द्वयोरपि च मध्यतः ॥
एवं विज्ञाय मतिमान् भोजनस्योपकल्पनाम् ।
भोक्तारं विजने रम्ये निःसम्बाधे शुभे शुचौ ॥
सुगन्धिपुष्परचिते समे देशेऽथ भोजयेत् ।
पूर्व्वं मधुरमश्नीयान्मध्येऽम्ललवणौ रसौ ॥
पश्चाच्छेषान् रसान् वैद्यो भोजनेष्ववचारयेत् ।
आदौ फलानि भुञ्जीत दाड़िमादीनि बुद्धिमान् ॥
ततः पेयांस्ततो भोज्यान् भक्ष्यांश्चित्रांस्ततःपरम् ।
घनपूर्व्वं समश्नीयात् केचिदाहुर्विपर्य्ययम् ॥
आदावन्ते च मध्ये च भोजनस्य तु शस्यते ।
अतीवायतयामास्तु क्षपा येष्वृतुषु स्मृताः ॥
तेषु तत्प्रत्यनीकाढ्यं भुञ्जीत प्रातरेव तु ।
येषु चापि भवेयुश्च दिवसा भृशमायताः ॥
तेषु तत्कालविहितमपराह्णे प्रशस्यते ।
रजन्यो दिवसाश्चैव येषु चापि समाः स्मृताः ॥
कृत्वासममहोरात्रं तेषु भुञ्जीत भोजनम् ।
तस्मात् सुसंस्कृतं युक्त्या दोषैरेतैर्विवर्ज्जितम् ।
यथोक्तगुणसम्पन्नमुपसेवेत भोजनम् ॥”

भोजनपात्रं, क्ली, (भोजनस्य पात्रम् ।) भक्ष्यद्रव्याधारः । यथा,—
“तिष्ठन्ति यत्र नवकाञ्चननिर्म्मितानि
श्रेणीकृतानि परितस्तु कटोरकाणि ।
राकाशशाङ्कनवमण्डलभास्करं यत्
स्यौणोऽत्तनं रजतनिर्म्मितथालकं स्यात् ॥
यथोर्द्ध्वप्रतिमादर्शिकांस्यमादर्शवत् शुचि ।
पात्रं दृढ़ं सुविस्तीर्णं स्त्रीणामत्यन्तदुर्लभम् ॥
पत्रावली भवति वा नृपभोजनाय
निर्जन्तुजालरहितामलवारिधौता ।
पालाशभूरुहदलैरचिता मनोज्ञा
ताडग्विपर्णकगणैः परिवेष्टिता च ॥”
इति पाकराजेश्वरः ॥

भोजपतिः, पुं, (भोजानां भोजवंशीयानां पतिः ।) कंसराजः । यथा,—
“मल्लानामशनिर्नृणां नरवरः स्त्रीणां स्मरो
मूर्त्तिमान्
गोपानां स्वजनोऽसतां क्षितिभुजां शास्ता
स्वपित्रोः शिशुः ।
मृत्युर्भोजपतेर्विराड़विदुषां तत्त्वं परं योगिनां
वृष्णीनां परदेवतेति विदितो रङ्गं गतः साग्रजः ॥”
इति श्रीभागवते १० स्कन्धे ४३ अध्याये १७ श्लोकः ॥

भोजपुरं, क्ली, (भोजस्य भोजराजस्य पुरम् ।) स्वनामख्यातदेशः ।
“आजिरभूद्भोजपुरे साकमसुरवरैः ।
हरे रेवापारे सवलो नूनं ते लघीयांसः ॥”
इति विदग्धमुखमण्डनम् ॥

भोजयिता, [ऋ] त्रि, (भुज् + णिच् + कर्त्तरि तृच् ।) भोजनकारयिता । भोगप्रयोजकः । यथा,
“कर्त्ता च देही भोक्ता च आत्मा भोजयिता
सदा ।
भोगो विभवभेदश्च निष्कृतिर्मुक्तिरेव च ॥”
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे २३ अध्याये ॥

भोजाधिपः, पुं, (भोजस्य अधिपः ।) कंसराजः । इति शब्दरत्नावली ॥

भोज्यं, त्रि, (भुज्यते इति । भुज् + कर्म्मणि + ण्यत् । “भोज्यं भक्ष्ये ।” ७ । ३ । ६९ । इति निपातनात् न कुत्वम्) भोजनीयद्रव्यम् । यथा,
“भोज्यं भोजनशक्तिश्च रतिशक्तिर्वराः स्त्रियः ।
विभवो दानशक्तिश्च नाल्पस्य तपसः फलम् ॥”
इति चाणक्ये ५१ श्लोकः ॥
अपि च ।
“आहारं षड्विधं चूष्यं पेयं लेह्यं तथैव च ।
भोज्यं भक्ष्यं तथा चर्व्व्यं गुरु विद्याद्यथोत्तरम् ॥”
चूष्यं इक्षुदण्डादि । पेयं पानकशर्करोदकादि । लेह्यं रसालाक्वथितादि । भोज्यं भक्तसूपादि । भक्ष्यं लड्डुकमण्डकादि । चर्व्व्यं चिपिटचणकादि । इति भावप्रकाशः ॥ (पितॄणां तृप्त्यर्थं देये अन्नादौ च ॥)
भोज्यदानस्येतिकर्त्तव्यता यथा । ॐ अद्यामुके मासि अमुके पक्षे अमुकतिथौ अमुकगोत्रस्य पितुरमुकदेवशर्म्मण एकोद्दिष्टविधिकसाम्वत्सरिकश्राद्धवासरे अमुकगोत्रस्य पितुरमुकदेवशर्म्मणोऽक्षयस्वर्गकाम इदं सघृतसवस्त्रोपकरणामान्नभोज्यमर्च्चितं श्रीविष्णुदैवतं यथासम्भवगोत्रनाम्ने ब्राह्मणायाहं ददानि । ततो दक्षिणा । ॐ अद्येत्यादि कृतैतत्सघृतसवस्त्रोपकरणामान्नभोज्यदानकर्म्मणः साङ्गतार्थं दक्षिणामिदं काञ्चनमूल्यं श्रीविष्णुदैवतं यथासम्भवगोत्रनाम्ने ब्राह्मणायाहं ददानि । कृतैतत्सघृतसवस्त्रोपकरणामान्नभोज्यदानकर्म्माच्छिद्रमस्तु । इति श्राद्धप्रयोगतत्त्वम् ॥

भोज्यसम्भवः, पुं, (सम्भवत्यस्मादिति सम्भव उत्पत्तिकारणम् । भोज्यं सम्भवोऽस्य ।) शरीरस्थरसधातुः । इति शब्दचन्द्रिका ॥

भोटाङ्गः, पुं, (भोटस्तज्जातिरङ्गमस्य ।) देशविशेषः । इति शब्दरत्नावली । भोटान् इति भाषा ॥ (भोटान्तोऽपि पाठः ॥)

भोभो, अ, सम्बोधनम् । इति हलायुधः ॥ (यथा, महानाटके । १ । १४ ।
“भोभो भुजङ्ग ! तरुपल्लवलोलजिह्व ! ॥”)

भोलानाथः, पुं, शिवः । यथा,—
“ब्रह्मणो वचनं श्रुत्वा भोलानाथः कृपानिधिः ।
संहृत्य तां महाज्वालां सगणोऽन्तरगान्मुने ॥”
इति श्रीशिवपुराणोत्तरखण्डे तुण्डिवामदेवसंवादे वाराणसीमाहात्म्ये पञ्चक्रोशीयात्रायां महाकालगणोत्पत्तिर्नाम २५ अध्यायः ॥ * ॥
पुस्तकान्तरे भोलानाथ इत्यत्र महादेव इति पाठः ॥

भौलिः, पुं, उष्ट्रः । इति त्रिकाण्डशेषः ॥

भौतः, पुं, (भूतानि प्राणिनोऽधिकृत्य प्रवृत्तः । भूत + अण् ।) भूतयज्ञः । बलिकर्म्म । यथा,—
“होमो दैवो बलिर्भौतो नृयज्ञोऽतिथिपूज-
नम् ॥”
इत्याह्निकतत्त्वम् ॥ देवलः । इति शब्दमाला ॥ (भिक्षादिभ्योऽण् । भूतसङ्घः । तस्येदमित्यण् ।) भूतसम्बन्धिनि, त्रि ॥

भौतिकं, क्ली, (भूतानां विकार इति ठक् ।) मुक्ता । इति राजनिर्घण्टः ॥ त्रि, भूतसम्बन्धि ॥ (भूतानि क्षित्यादीनि तद्विकारश्च गोघटवृक्षादयः ।
“आहङ्कारिकत्वश्रुतेर्न भौतिकानि ।” इति । २ । २० । सांख्यसूत्रम् ॥ सृष्टिविशेषश्च । तथाच । “ईश्वरकृष्णकृतसांख्यकारिकायाम् । अष्टविकल्पो दैवस्तैर्य्यग्योनश्च पञ्चधा भवति । मानुष्यश्चैकविधः समासतो भौतिकः सर्गः ॥ अत्र च सर्गे चैतन्योत्कर्षापकर्षविशेषात् तारतम्यम् । यथा, तत्रैव । ऊर्द्ध्वं सत्त्वविशालस्तमोविशालश्च मूलतः सर्गः । मध्ये रजोविशालो ब्रह्मादिस्तम्बपर्य्यन्तः ॥

भौतिकः, पुं, महादेवः । इति त्रिकाण्डशेषः ॥ (उपद्रवः । व्याध्यादिः । चक्षुरादि । शरीरादि ॥ (भूतेषु महदादिक्षित्यन्तेषु आत्मबुद्ध्या उपासकाः भौतिकाः । बौद्धविशेषाः ।
“भौतिकास्तु शतं पूर्णं सहस्रन्त्वाभिमानिकाः ॥”
इति पातञ्जलयोगसूत्रव्यासभाष्यटीकायां वाचस्पतिमिश्रधृतवचनम् । १ ।२६ ॥)

भौती, स्त्री, (भूतानां भूतयोनीनामियमिति । भूत + अण् । ङीप् । तस्यां भूतानामधिकारित्वविद्यमानत्वात्तथात्वम् ।) रात्रिः । इति हेमचन्द्रः । १४२ ॥

भौत्यः, पुं. (भूतेरपत्यं पुमान् । भूतिः + अपत्यार्थे ष्यञ् ।) भूतिमुनिपुत्त्रश्चतुर्द्दशो मनुः । यथा,—
मार्कण्डेय उवाच ।
“अतः परन्तु भौत्यस्य त्वमुत्पत्तिं निशामय ।
देवानृषींस्तथा पुत्त्रांस्तथैव वसुधाधिपान् ॥
बभूवाङ्गिरसः पुत्त्रो भूतिर्नाम्नातिकोपनः ।
तस्य भ्राता सुवर्च्चाभूद् यज्ञे तेन निमन्त्रितः ॥
यियासुः शान्तिनामानं शिष्यमाह महामुनिः ।
सदोद्युक्तं सदाचारमुदारं मुनिसत्तमम् ॥
भूतिरुवाच ।
अहं यज्ञं गमिष्यामि भ्रातुः शान्ते ! सुवर्च्चसः ।
तेनाहूतस्त्वया चेह यत् कर्त्तव्यं शृणुष्व तत् ॥
अतिजागरणं वह्नेस्त्वया कार्य्यं ममाश्रमे ।
तथा तथाप्रमत्तेन यथाग्निर्न शमं व्रजेत् ।
इत्याज्ञप्ते तथेत्युक्तः स तु शिष्येण शान्तिना ।
जगाम यज्ञं तं भ्रातुराहूतः सह यवीयसा ॥
प्रशान्तस्तावदनलो योऽसौ भूतिपरिग्रहः ।
तं दृष्ट्वा सोऽनलं शान्तं शान्तिरत्यन्तदुःखितः ।
भीतश्च भूतेर्बहुधा चिन्तयन् स महाद्युतिः ॥